National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 01-03
© 2026 NJHSR
www.sanskritarticle.com

**शुभ चौनी**
शोधच्छात्रः,शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**शुभ चौनी**
शोधच्छात्रः,शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयज्ञानपरम्परादृष्ट्या संगणकसहकृतशिक्षणमाध्यमेन संस्कृतव्याकरणशिक्षणनम्

**शुभ चौनी**

**सारांशः-**
लेखेऽस्मिन् अनुसन्धाता भारतीयज्ञानपरम्पराधारित-संगणकसाहाय्येन कथं सहजतया संस्कृतव्याकरणं नाम महर्षिपाणिना विरचितस्य अष्टाधाय्याः अववोधः सुखकरं भवति तस्मिन् विषये आलोचयति। साक्षात् विषयस्य उपस्थापनं नैव सम्भवति अतः आदौ संस्कृतव्याकरणस्य महत्वं प्रदर्शयति। अनन्तरं भारतीयज्ञानपरम्परारीत्या व्याकरणशिक्षणस्य आवश्यकतां दर्शयति। एकविंशतिशताब्दीतः सर्वत्र संगणकस्य प्रभावः अधिकाधिकं दृश्यते। अतः संगणकमाध्यमेण कथं सम्भवति, तस्मिन् विषये लिखति। एवमेव गुरुकुलपद्धतेः तथा आधुनिकपद्धतेः समन्वयनमपि दर्शयति।
**कूटशव्दाः**- भारतीयज्ञानपरम्परा, संगणकसहकृतशिक्षण, संस्कृतव्याकरणम्

**उपोद्धातः-**

संस्कृतभाषा जगतस्य प्रचीनतमा भाषा अस्ति, या केवलं संप्रेषणमाध्यं न अपितु भारतीय-ज्ञानपरम्परायाः आधारभूतं साधानं च अस्ति। नूतनशिक्षानितौ (NEP 2020) भारतीयज्ञान-परम्परासंवर्धनाय विशेषं बलं दत्तम् अस्ति। अस्यां परम्परायां संस्कृतव्याकरणस्य अध्ययनं महत्त्वपूर्णं स्थाननं धारयति। अतः संगणकस्य साहाय्येन संस्कृतव्याकरणस्य गहणम् अध्ययनम् अत्यावश्यकम्। यतो हि इदानीं सर्वत्र सर्वकार्येषु संगणकस्य प्रभावः दरीदृश्यते। अतः तस्य प्रभावः शिक्षाक्षेत्रेऽपि समाविष्टाः सन्ति। प्रौद्यगीक्याः प्रभावः Engineering इत्यादिविषयेषु आसीत् एव परन्तु संस्कृतशिक्षाक्षेत्रे तादृशं प्रभावं नासीत्। परन्तु 2020 तमवर्षस्य करोणापरं संस्कृतशिक्षाक्षेत्रेऽपि सर्वत्र प्रचाल्यमानामस्ति। अतः संस्कृतव्याकरणमपि सुखवोधाय संगणकस्य उपयोगं अवश्यं कर्तव्यम् इति। परन्तु आदौ संगणकसहकृतशिक्षणस्य स्वरुपविषये भारतीयज्ञानपरम्पराविषये च ज्ञातव्यम्।

**सङ्गणकसहकृतशिक्षणस्य स्वरुपम्-**

**1. ई-लर्निङ्ग् (E-Learning)**

सङ्गणकमाध्यमेन छात्राः पाठ्यसामग्रीं पठित्वा शिक्षणं कुर्वन्ति। उदाहरणं यथा ऑनलाइन पाठ्यक्रमाः, शैक्षिक सॉफ्टवेयर, वेबिनारः च।

**2. मल्टीमीडिया शिक्षणम् (Multimedia Learning)**

शिक्षणं रोचकं सुबोधं सुखकरं च कर्तुं सङ्गणकः चित्राणि, ध्वनि, चलच्चित्राणि (Videos) च उपयुज्यते। उदाहरणं यथा – एनिमेटेड वीडियो, शैक्षिक चलचित्राणि, ऑडियो-लेक्चर इत्यादि।

**3. इण्टरऐँक्टिव्-लर्निङ्ग् (Interactive Learning)**

छात्राः सङ्गणकस्य सहाय्येन स्वतन्त्रतया शिक्षणं कुर्वन्ति। स्वपरीक्षा, क्विज्, सिम्युलेशन्, गेम्-आधारित-शिक्षणं च अत्र अन्तर्भूतानि सन्ति।

**4. स्व-गति-शिक्षणम् (Self-Paced Learning)**

छात्राः स्वयमेव शिक्षणं कर्तुं शक्नुवन्ति। समयबन्धनं नास्ति, ते स्वगत्या पठित्वा पुनरावृत्तिं कुर्वन्ति।

**5. स्वमूल्याङ्कनम्( self-evaluation)**

**छात्रैः पठिताः विषयाः ते स्वयं मूल्याङ्कनं कर्तुं शक्नुवन्ति। उदाहरणं यथा- इदाननीं विभिन्नानि software सन्ति। यथा- Performance management software, learning management systems, Insight7 इत्यादयः।**

**भारतीयज्ञानपरम्परा नाम किम्?**

भारतीयज्ञानपरम्परा (Indian Knowledge System) इति भारतस्य प्राचीनं समृद्धं च ज्ञानसंग्रहं बोधयति। अस्मिन् तत्त्वे वेदाः, उपनिषदः, दर्शनशास्त्राणि, आयुर्वेदः, योगः, ज्योतिषशास्त्रम्, वास्तुशास्त्रम्, अर्थशास्त्रम्, नाट्यशास्त्रम् इत्यादीनि समाविष्टानि सन्ति। एषा परम्परा केवलं आध्यात्मिकं नास्ति, अपितु विज्ञानं, गणितं, चिकित्सा, शिल्पकला, सामाजिकविज्ञानं च अपि आवहति। भारतीयज्ञानपरम्परायाः मूलं संस्कृतभाषायां निहितम् अस्ति, यत्र ऋषयः मुनयः च विविधेषु ग्रन्थेषु ज्ञानं संरक्षितवन्तः। एषा प्रणाली न केवलं भूतकालस्य गौरवम्, अपितु आधुनिकजगति अपि उपयोगी अस्ति। परन्तु अस्याः मूलं संकृतभाषायां निहितमस्ति, संस्कृतेतरजनाः संस्कृतं न जानन्ति अतः संस्कृतज्ञानं विना अस्य अर्थग्रहनं न सम्भवति। संस्कृतज्ञानाय आदौ व्याकरणमं पठनीयम्। यतोहि मनुषस्य अवयवं दृष्ट्वा यथा तस्य परिचयमं ज्ञातु न शक्नोति, यावत् पर्यन्तं मुखं न पश्यन्ति, तथैव व्याकरणज्ञानं विना अन्यानां शास्त्राणां ज्ञानं क्लेशकरं भवति। अतः उक्तम्- **"मुखं व्याकरणं स्मृतम्"।**

**भारतीयज्ञानपरम्परादृष्ट्या व्याकरणस्य महत्त्वम्-**

प्रचीनकालादेव भारतेऽस्मिन् व्याकरणशास्त्रं विद्यायाः मूलमितिविचिन्त्यते। व्याकरणं भाषायाः आत्मा इत्युच्यते, तस्मात् तं विना भाषा अशुद्धा भविष्यति। वेदेषु स्मृतिषु महाकाव्येषु च व्याकरणस्य महत्वं विशेषेण प्रतिपादितमस्ति।

**व्याकरणस्य आध्यात्मिकमहत्वम्-**

व्याकरणं केवलं भाषायाः नियमसंहिता न अपितु आध्यात्मिकदृष्ट्या अपि परं महत्त्वपूर्णम्। भारतीयदर्शनपरम्परायाम् अपि केचन महत्त्वम् अस्ति। तद् यथा-

**1. शब्दशुद्धिः मनःशुद्धिश्च-**

व्याकरणज्ञानेन शब्दानां प्रयोगः सम्यक् भवति। भाषायाः अशुद्धिः विचारानामपि अशुद्धिं जनयति। अतः व्याकरणं मनःशुद्धेः साधनं भवति।

**2. वाङ्मयस्य शुद्धिः तपः-**

मनुना उक्तम्- सत्यं ब्रूयात् प्रियं ब्रूयात् इति। परन्तु सत्यस्य स्वरुपं व्याकरणं विना न ज्ञायते। अतः शुद्धवाणीप्रयोगः तपोमयः कार्यं इति मन्यते।

**3. धर्मज्ञानस्य आधारः-**

श्रुतिषु स्मृतिषु च व्याकरणस्य ज्ञानं धर्मस्य सुस्पष्टज्ञानाय आवश्यकम्। व्याकरणं विना शास्त्रार्थस्य यथार्थग्रहणं न सम्भवति।

**4. वेदाध्यायनस्य साघनम्-**

वेदेषु प्रत्येकं मन्त्रः व्याकरणशुद्ध्या पठनीयः अशुद्धपाठः विपरीतमर्थं जनयति। अतः वेदस्वाध्याये व्याकरणं अत्यावश्यकम्।

**5. मोक्षमार्गस्य दीपः-**

भगवद्गीतायां भगवता श्रीकृष्णेन उक्तम्- **"ओमित्येकाक्षरं ब्रह्म"** इति । यत्र शब्दस्य शुद्धिः, तत्र ब्रह्मज्ञानस्य सम्भावना। व्याकरणं न केवलं लौकिकजीवने, अपितु आध्यात्मिकमार्गस्य अपि प्रकाशदीपः। अतः व्याकरणं केवलं लौकिकविद्यायाः साधनं न, अपितु आध्यात्मिकविकासस्य मूलम्। भाषा शुद्धा चेत् विचाराः अपि शुद्धाः भवन्ति, विचारशुद्धिद्वारा जीवनस्य उन्नतिः सम्भवति। व्याकरणं धर्मस्स ज्ञानस्य मोक्षस्य च पथप्रदर्शकमस्ति। तस्मात् सर्वेभ्यः व्याकरणस्य अध्ययनं कर्तव्यम्।

**गुरुकुलपद्धतेः आधुनिकपद्धतेः च समन्वयः-**

गुरुकुलपद्धिः भरतीयज्ञानपद्धत्याः प्रमुखः अंशः अस्ति। पारम्परिकगुरुकुलेषु व्याकरणशिक्षणं मौखिकरीत्या उदाहरणैः तथा श्लोकस्मरणेन च कृयते। परन्तु आधुनिककाले शिक्षायाः शैली परिवर्तिता जाता। यथा-

**गुरुकुलपद्धत्या शिक्षणम्-**

1. शिक्षक-शिष्यसंवादः प्रत्यक्षरुपेण भवति।
2. धारणशक्तेः (Memory power) वर्धनम्।
3. गुरुशिष्यपरम्परायाः पालनम्।
4. नैतिकशिक्षणस्य समावेशः।

**आधुनिकपद्धत्या शिक्षणम्-**

1. डिजिटलमाध्यमस्य प्रयोगः।
2. सङ्गणकसाहाय्येन शिक्षणम्।
3. वैश्विकस्तरे शिक्षणस्य प्रसारः।
4. शिक्षणस्य सुलभता।

अतएव, यद्यपि गुरुकुलपद्धतिः अतीव महत्वपूर्णा तथापि युगोपयगि करणार्थं आधुनिकपद्धत्या सह तस्य समन्वयः आत्यावश्यकम्। अतः उदाहरणत्वेन अत्र शोधकर्ता कारकप्रकरणं स्वीकृतवान्। यथा-

**संगणकद्वारा कारकविभक्तिशिक्षणस्य उपायाः-**

क्रयान्वयि कारकम्। क्रियया सह साक्षात् कर्तुः सम्बन्धः एव कारकम्। करकाणि षट्। यथा-

1.कर्तृकारकम् 2.कर्मकारकम् 3. करणकारकम् 4. सम्प्रदानकारकम् 5. अपादानकारकम् 6. अधिकरणकारकम् इति

संख्याकारकवोधयित्रि विभक्तिः। विभक्तयः सप्तः। यथा- 1. प्रथमा विभक्तिः 2. द्वितीया विभक्तिः 3. तृतीया विभक्तिः 4. चतुर्थी विभक्तिः 5. पञ्चमि विभक्तिः 6. षष्ठी विभक्तिः 7. सप्तमी विभक्तिः। अतः एतेषां कारकविभक्तिनां पाठनं कथं भवितुमर्हति तद् अधः निर्दिश्यते। यथा-

1. **नैसर्गिकभाषाप्रसंस्करणम् (Natural language processing (NLP) in Sanskrit Grammar)**

संगणकीयप्रणाली संस्कृतशब्दानां विश्लेषणं कृत्वा, कारकविभक्तीनां समुचितं प्रयोगं प्रदर्शयितुं शक्नोति। उदाहरणरूपेण, Google AI इत्यस्य कृत्रिमबुद्ध्या संस्कृतवाक्यानां कारकानां विश्लेषणं कर्तुं शक्यते।

2. **ऑनलाइन पाठ्यक्रमाः (Online Learning Platforms)**

अधुना Coursera, Udemy, National programmed on Technology enhanced learning (NPTEL) इत्यादिषु संस्कृतव्याकरणस्य पाठ्यक्रमाः विद्यन्ते, यत्र कारकविभक्तीनां शिक्षणं कृत्रिमबुद्ध्या सह सम्भवति।

3. **कृत्रिमबुद्ध्या आधारितः संस्कृतसंवादकः (AI-based Sanskrit Tutor)**

यदि AI-आधारितः शिक्षकः भवति, सः छात्रानां उत्तरानां संशोधनं कृत्वा, उत्तमां विभक्तिं निर्देशयितुं शक्नोति।

4. **संस्कृतशब्दरूपसङ्कलकः (Sanskrit Morphological Analyzer)**

संगणकः संस्कृतशब्दानां रूपाणि, विभक्तयः, कारकाणि च स्वयमेव विश्लेषणं कृत्वा प्रदर्शयितुं शक्नोति।

5. **मोबाइल एप्लिकेशन्स् (Mobile Applications for Sanskrit Learning)**

धातुरूपमंजरी, संस्कृत OCR, Learn Sanskrit इत्यादयः अनुप्रयोगाः संस्कृतशिक्षायाः महत्त्वपूर्णाः सन्ति।

**भविष्यस्य सम्भावनाः**

**1.संस्कृतस्वरबोधी AI प्रणाली (Voice-based AI for Sanskrit Learning)**

यदि AI प्रणाली संस्कृतभाषायाः स्वरोद्भवज्ञानं कर्तुं शक्नोति, तर्हि कारकविभक्तीनां समुचितः प्रयोगः छात्राः शीघ्रं ज्ञातुं शक्नुयुः।

**२. संस्कृतवाक्यसमीक्षकः (Sanskrit Grammar Checker)**

यथा English मध्ये Grammarly अस्ति, तथा यदि AI आधारितः संस्कृतव्याकरणसमीक्षकः भवति, सः कारकविभक्तीनां दोषान् प्रदर्शयितुं शक्नोति।

**३. संस्कृतसंवादप्रशिक्षणम् (Conversational AI in Sanskrit)**

AI-आधारितः तन्त्रांशः यदि संस्कृतसंवादं समर्थयति, तर्हि छात्राः संवादमाध्यमेन कारकविभक्तीनां शिक्षणं कर्तुं शक्नुयुः।

**निष्कर्षः**

उनविंशतिशताब्देः परं आसंसारे सर्वेषु कार्येषु संगणकस्य व्यवहारः सर्वत्रं दरीदृश्यते। अतः तस्य प्रभावः शिक्षाक्षेत्रेऽपि समागतः अस्ति। तदर्थं संस्कृतशिक्षाक्षेत्रेऽपि अस्य समन्वयनम् अत्यावश्यकम्।

संगणकप्रणाली संस्कृतव्याकरणस्य शिक्षायाः नवद्वाराणि उद्घाटयति। विशेषतः कारकविभक्तीनां शिक्षायां प्रौद्योगिकी महतीं भूमिकां निर्वहति। यदि वयं AI, NLP, विभिन्नानि संस्कृतपाठ्यवस्तोपलब्धानि app यथा- Ashtadhyayi.com, धातुरुप 360°, सिद्धान्तकौमुदी इत्यादयः। तथा अन्यैः प्रौद्योगिकीयसाधनैः संस्कृतव्याकरणस्य अध्ययनं संवर्धयामः, तर्हि संस्कृतशिक्षणं सर्वसुलभं, सरलं, रोचकं च भविष्यति।

<u>**सन्दर्भग्रन्थसूचि**</u>


1.डा. शिवकुमारी काटूरि, संस्कृतव्याकरणशास्त्रप्रवेशिनी, तिरुपति, राष्ट्रियसंस्कृतविद्यापीठम्, 2018.
2.डा. सच्चिदानन्द मुखोपाध्याय, वैयाकरण सिद्धान्तकौमुदी, कलकाता,साहित्य निकेतन,1971
3. https://timesofindia.indiatimes.com
4. https://medium.com
5. https://www.linkedin.com
6. https://susiddha.org
7. https://www.scribd.com/document/372259400/Teach-grammar-through-technology
8. https://www.slideshare.net/slideshow/ict-in-teaching-grammar-230067942/230067942
9. https://rsisinternational.org/journals/ijrias/articles/artificial-intelligence-in-the-teaching-of-english-grammar/
10. https://www.scribd.com/document/507765630/02-MOOC-Unit-4-Teaching-Grammar-Using-Technology